NCERT
National Council Of Educational Research And Training

NCERT Solutions for 8th Class Sanskrit: Chapter 1-सुभाषितानि

IndCareer
Schools

indCareer indCareer indCareer

# NCERT Solutions for 8th Class Sanskrit: Chapter 1-सुभाषितानि

Class 8: Sanskrit Chapter 1 solutions. Complete Class 8 Sanskrit Chapter 1 Notes.

## NCERT Solutions for 8th Class Sanskrit: Chapter 1-सुभाषितानि

NCERT 8th Sanskrit Chapter 1, class 8 Sanskrit Chapter 1 solutions

**1.** पाठे दत्तानां पद्यानां सस्वरवाचनं कुरुत।

उत्तराणि:

(पाठ में दिए गए श्लोकों का सस्वर वाचन करें)

**2.** श्लोकांशेषु रिक्तस्थानानि पूरयत

(श्लोकांशों में रिक्त स्थानों की पूर्ति करें)

(क) समुद्रमासाद्य ………………… |

उत्तराणि:

समुद्रमासाद्य भवन्त्यपेयाः।

(ख) …………………….. वचः मधुरसूक्तरसं सृजन्ति।

उत्तराणि:

श्रुत्वा वचः मधुरसूक्तरसं सृजन्ति ।

(ग) तद्भागधेयं ……………………….. पशूनाम्।

उत्तराणि:

तद्भागधेयं परमं पशूनाम् ।

(घ) विद्याफलं ……………………….. कृपणस्य सौख्यम्।

उत्तराणि:

विद्याफलं व्यसनिनः कृपणस्य सौख्यम्।

(ङ) पौरुषं विहाय यः ……………………… अवलम्बते।

उत्तराणि:

पौरुषं विहाय यः दैवमेव अवलम्बते।

(च) चिन्तनीया हि विपदाम् …………………… प्रतिक्रियाः

उत्तराणि:

चिन्तनीया हि विपदाम् आदावेव प्रतिक्रियाः।

**3.** प्रश्नानाम् उत्तराणि एकपदेन लिखत –

(प्रश्नों के उत्तर एक पद में लिखें)

(क) व्यसनिनः किं नश्यति?

उत्तराणि:

विद्याफलम्।

(ख) कस्य यशः नश्यति?

उत्तराणि:

लुब्धस्य

(ग) मधुमक्षिका किं जनयति?

उत्तराणि:

माधुर्यम्।

(घ) मधुरसूक्तरसं के सृजन्ति?

उत्तराणि:

सन्तः

(ङ) अर्थिनः केभ्यः विमुखा न यान्ति?

उत्तराणि:

महीरुहेभ्यः ।

**4.** अधोलिखित-तद्भव-शब्दानां कृते पाठात् चित्वा संस्कृतपदानि लिखत

(अधोलिखित तद्भव शब्दों के लिए पाठ से चयन करके संस्कृत पद लिखो)

यथा – कंजूस – कृपणः

कड़वा – .............

पूँछ – .............

लोभी – .............

मधुमक्खी – .............

तिनका – .............

उत्तराणि:

कड़वा – कटुकम्।

पूँछ – पुच्छः ।

लोभी – लुब्धः ।

मधुमक्खी – मधुमक्षिका।

तिनका – तृणम्।

NCERT 8th Sanskrit Chapter 1, class 8 Sanskrit Chapter 1 solutions

**5.** अधोलिखितेषु वाक्येषु कर्तृपदं क्रियापदं च चित्वा लिखत

(अधोलिखित वाक्यों में कर्त्तापद और क्रियापदों का चयन करके लिखो)

| वाक्यानि | कर्त्ता | क्रिया |
|---|---|---|
| यथा–सन्तः मधुरसूक्तरसं सृजन्ति। | सन्तः | सृजन्ति |
| (क) निर्गुणं प्राप्य भवन्ति दोषाः। | ..................... | ..................... |
| (ख) गुणज्ञेषु गुणाः भवन्ति। | ..................... | ..................... |
| (ग) मधुमक्षिका माधुर्यं जनयेत्। | ..................... | ..................... |
| (घ) पिशुनस्य मैत्री यशः नाशयति। | ..................... | ..................... |
| (ङ) नद्यः समुद्रमासाद्य अपेयाः भवन्ति। | ..................... | ..................... |

उत्तराणि:

कर्तृपदम् – क्रियापदम्

(क) दोषाः – भवन्ति।

(ख) गुणाः – भवन्ति।

(ग) मधुमक्षिका – जनयेत्।

(घ) मैत्री – नाशयति।

(ङ) नद्यः – भवन्ति।

**6.** रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत **–**

**(रेखांकित पदों के आधार पर प्रश्न निर्माण करो)**

**(क)** गुणाः गुणज्ञेषु गुणाः भवन्ति ।

**उत्तराणि:**

के गुणज्ञेषु गुणाः भवन्ति?

**(ख)** नद्यः सुस्वादुतोयाः भवन्ति।

**उत्तराणि:**

काः सुस्वादुतोयाः भवन्ति?

(ग) लुब्धस्य यशः नश्यति।

**उत्तराणि:**

कस्य यशः नश्यति?

**(घ)** मधुमक्षिका माधुर्यमेव जनयति।

**उत्तराणि:**

का माधुर्यमेव जनयति?

**(ङ)** तस्य मूर्ध्नि तिष्ठन्ति वायसाः।

**उत्तराणि:**

तस्य कुत्र तिष्ठन्ति वायसाः।

**7.** उदाहरणानुसारं पदानि पृथक् कुरुत

**(उदाहरण के अनुसार पदों को पृथक्-पृथक् करो)**

यथा- समुद्रमासाद्य – समुद्रम् + आसाद्य

(क) माधुर्यमेव – ………………… + …………………|

(ख) अल्पमेव – ………………… + …………………|

(ग) सर्वमेव – ………………… + …………………|

(घ) दैवमेव – ………………… + …………………|

(ङ) महात्मनामुक्तिः – ………………… + …………………|

(च) विपदामादावेव – ………………… + …………………|

उत्तराणि:

(क) माधुर्यमेव – माधुर्यम् + एव।

(ख) अल्पमेव – अल्पम् + एव।

(ग) सर्वमेव – सर्वम् + एव।

(घ) दैवमेव – दैवम् + एव।

(ङ) महात्मनामुक्तिः – महात्मनाम् + उक्तिः ।

(च) विपदामादावेव – विपदाम् + आदौ + एव।

NCERT 8th Sanskrit Chapter 1, class 8 Sanskrit Chapter 1 solutions

## Additional Important Questions and Answers

अधोलिखितं श्लोकं पठित्वा श्लोकाधारितानां प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत –

*(1)* गुणा गुणज्ञेषु गुणा भवन्ति।

ते निर्गुणं प्राप्य भवन्ति दोषाः॥

सुस्वादुतोयाः प्रभवन्ति नद्यः।

समुद्रमासाद्य भवन्त्यपेयाः॥

I. एकपदेन उत्तरत –

**(i)** गुणाः किं प्राप्य दोषाः भवन्ति**?**

उत्तराणि:

निर्गुणम्।

**(ii)** काः अपेयाः भवन्ति**?**

उत्तराणि**:**

नद्यः।

**II.** पूर्णवाक्येन उत्तरत

**(i)** किमासाद्य नद्यः अपेयाः भवन्ति**?**

उत्तराणि**:**

नद्यः समुद्रम् आसाद्य अपेयाः भवन्ति।

**(ii)** गुणज्ञेषु के गुणाः भवन्ति**?**

उत्तराणि**:**

गुणाः गुणज्ञेषु गुणाः भवन्ति।

**III.** निर्देशानुसारम् प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत –

(i) 'ते' इत्यस्य स्थाने संज्ञापदं किम्?

(क) नद्यः

(ख) गुणाः

(ग) दोषाः

(घ) अपेयाः

उत्तराणि**:**

(ख) गुणाः ।

(ii) 'अवगुणाः' इति पदस्य समानार्थकं पदं श्लोकात् चित्वा लिखत।

(क) अपेयाः

(ख) गुणाः

(ग) दोषाः

(घ) निर्गुणाः

उत्तराणि:

(ग) दोषाः।

(iii) 'अपेयाः' इति पदस्य कर्तृपदं किम्?

(क) समुद्रम्

(ख) नद्यः

(ग) तोयाः

(घ) दोषाः

उत्तराणि:

(ग) तोयाः ।

(iv) 'गुणज्ञेषु' इत्यस्मिन् पदे विभक्तिः का?

(क) सप्तमी

(ख) षष्ठी

(ग) पञ्चमी

(घ) चतुर्थी

उत्तराणि:

(क) सप्तमी।

*(2)* साहित्यसङ्गीतकलाविहीनः।

साक्षात्पशुः पुच्छविषाणहीनः॥

तृणं न खादन्नपि जीवमानः।

तद्भागधेयं परमं पशूनाम्॥

**I.** एकपदेन उत्तरत

(i) पुच्छविषाणहीनः कः अस्ति?

उत्तराणि:

कलाविहीनः।

(ii) कः तृणं न खादन्नपि जीवमानः अस्ति?

उत्तराणि:

साक्षात्पशुः।

**II.** पूर्णवाक्येन उत्तरत

**(i)** साक्षात् पशुः कः अस्ति**?**

उत्तराणि:

कलाविहीनः जनः साक्षात् पशुः अस्ति।

**III.** निर्देशानुसारम् उत्तरम् लिखत

**(i)** 'खादन्नपि' इत्यत्र सन्धिविच्छेदः विधेयः।

उत्तराणि:

खादन् अपि।

**(ii)** 'जीवमानः' इत्यस्य पर्यायशब्दं लिखत।

उत्तराणि:

जीवितः सन्।

**(iii)** 'विषाणहीनः' इत्यस्य विग्रहं लिखत।

उत्तराणि:

विषाणेन-हीन।

समुचितपदेन रिक्तस्थानानि पूरयत, येन कथनानां भावः स्पष्टो भवेत् –

**(क)** लुब्धस्य नश्यति यशः पिशुनस्य मैत्री –

अस्य भावः अस्ति यद् लोभिनः ……………………………… नष्टं ………,
पिशुनस्य………………… नष्टा भवति।

उत्तराणि:

लोभिनः यशः नष्टं भवति, पिशुनस्य मित्रता नष्टा भवति।

**(ख)** स्त्रियां रोचमानायां सर्वं तद् रोचते कुलम् –

अस्य भावः अस्ति यत् स्त्रियां ……. ……….. सर्वं तद् ………………. …………|

उत्तराणि:

स्त्रियां प्रसन्नायां सर्वं तद् कुलं शोभते।

अधोलिखितयोःसूक्तयोः शुद्धं अर्थं चित्वा लिखत।

(क) कृपणस्य सौख्यम्।

(i) कृपणः सुखी भवति।

(ii) कृपणस्य सुखं नश्यति।

(iii) लोभी सुखी भवति।

(iv) कृपणः सुन्दरः भवति।

उत्तराणि:

(ii) कृपणस्य सुखं नश्यति।

(ख) अर्थपरस्य धर्मः।

(i) स्वार्थी धर्मं जानाति।

(ii) स्वार्थी धर्मं नाशयति।

(iii) अर्थी धर्मं प्राप्नोति।

(iv) अर्थपरायणस्य जनस्य धर्मः नश्यति।

उत्तराणि:

(iv) अर्थपरायणस्य जनस्य धर्मः नश्यति।

अधोलिखितेषु भावकथनेषु यत् कथनं शुद्धं तत् ( ✓ ) चिह्नन, यच्चाऽशुद्धं तत् ( ✗ ) चिह्नन अङ्कयत।

(क) नद्यः समुद्रमासाद्य भवन्त्यपेयाः।

(i) नद्यः समुद्रमासाद्य पेयाः भवन्ति।

(ii) नद्यः सागरं प्राप्य अपेयाः भवन्ति।

उत्तराणि:

(i) नद्यः समुद्रमासाद्य पेयाः भवन्ति। ( ✗ )

(ii) नद्यः सागरं प्राप्य अपेयाः भवन्ति। (✓ )

(ख) लुब्धस्य नश्यति यशः।

(i) लोभिनः सम्मानो नष्टो भवति।

(ii) लुब्धस्य धनं वर्धते।

उत्तराणि:

(i) लोभिनः सम्मानो नष्टो भवति। (✓ )

(ii) लुब्धस्य धनं वर्धते। ( ✗ )

अधोलिखितश्लोकांशान् परस्परं मेलयित्वा लिखत।

(क) – (ख)

सुस्वादुतोयाः प्रभवन्ति नद्यः – वर्धितानां परैरपि।

साहित्यसंगीतकलाविहीनः – सर्वमेव न रोचते।

महतां प्रकृतिः सैव – साक्षात्पशुः पुच्छविषाणहीनः।

तस्यां त्वरोचमानायां – समुद्रमासाद्य भवन्त्यपेयाः।

उत्तराणि:

(क) – (ख)

सुस्वादुतोयाः प्रभवन्ति नद्यः – समुद्रमासाद्य भवन्त्यपेयाः।

साहित्यसंगीतकलाविहीनः – साक्षात्पशुः पुच्छविषाणहीनः।

महतां प्रकृतिः सैव – वर्धितानां परैरपि।

तस्यां त्वरोचमानायां – सर्वमेव न रोचते।

अधोलिखितानां श्लोकानाम् अन्वयं कुरुत

(क) साहित्यसङ्गीतकलाविहीनः

साक्षात्पशुःपुच्छविषाणहीनः।

उत्तराणि:

साहित्यसङ्गीतकलाविहीनः (जनः) पुच्छविषाणहीनः साक्षात् पशुः (एव) (अस्ति)।

(ख) लुब्धस्य नश्यति यशः पिशुनस्य मैत्री

नष्टक्रियस्य कुलमर्थपरस्य धर्मः।

उत्तराणि:

लुब्धस्य यशः, पिशुनस्य मैत्री, नष्टक्रियस्य कुलम्, अर्थपरस्य धर्मः नश्यति ।

अधोलिखितेषु कथनेषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं क्रियताम् –

(क) लुब्धस्य यशः नश्यति।

(i) कः

(ii) किम्

(iii) के

(iv) कम्

उत्तराणि:

(क) लुब्धस्य किम् नश्यति?

(ख) गुणाः निर्गुणं प्राप्य भवन्ति दोषाः।

(i) कः

(ii) का

(iii) के

(iv) काः

उत्तराणि:

(ख) के निर्गुणं प्राप्य भवन्ति दोषाः?

(ग) अर्थपरस्य धर्मः नश्यति।

(i) कस्य

(ii) कस्याः

(iii) केषाम्

(iv) के

उत्तराणि:

(ग) कस्य धर्मः नश्यति?

NCERT 8th Sanskrit Chapter 1, class 8 Sanskrit Chapter 1 solutions

अधोलिखितानां शब्दानाम् अर्थान् निर्दिश्य वाक्येषु प्रयोगं कुरुत –

लुब्धः, मैत्री, सौख्यम्।

उत्तराणि:

(i) लुब्धः = लोभी।

लुब्धः सम्मानं न लभते।

(ii) मैत्री = मित्रता।

सज्जनानां मैत्री स्थायिनी भवति।

(iii) सौख्यम् = सुख।

परोपकारेण सौख्यम् भवति।

अधोलिखितानां शब्दानां समक्षं प्रदत्तैः अर्थैः सह मेलनं क्रियताम् –

शब्दाः – अर्थाः

(i) दोषाः – जीवितः

(ii) आसाद्य – रहितः

(iii) विहीनः – शृङ्गः

(iv) विषाणः – प्राप्य

(v) जीवमानः – लोभिनः

(vi) लुब्धस्य – अवगुणाः।

**उत्तराणि:**

शब्दाः – अर्थाः

(i) दोषाः – अवगुणाः

(ii) आसाद्य – प्राप्य

(iii) विहीनः – रहितः

(iv) विषाणः – शृङ्गः

(v) जीवमानः – जीवितः

(vi) लुब्धस्य – लोभिनः।

NCERT 8th Sanskrit Chapter 1, class 8 Sanskrit Chapter 1 solutions

**1.** निम्नश्लोकद्वयं पठित्वा प्रश्नान् उत्तरत –

*(क)* लुब्धस्य नश्यति यशः पिशुनस्य मैत्री,

नष्टक्रियस्य कुलमर्थपरस्य धर्मः।

विद्याफलं व्यसनिनः कृपणस्य सौख्यं

राज्यं प्रमत्तसचिवस्य नराधिपस्य।।

(i) अर्थपरस्य किम् नश्यति?

(क) यशः

(ख) धर्मः

(ग) मैत्री

(घ) भूपतिः

उत्तराणि:

(ख) धर्मः

(ii) पूर्णवाक्येन उत्तरत___लुब्धस्य, नष्टक्रियस्य पिशुनस्य च किं किं नश्यन्ति? ।

उत्तराणि:

लुब्धस्य यशः, नष्टक्रियस्य कुलं पिशुनस्य च मैत्री नश्यन्ति।

**(iii)** ‘नराधिपस्य’ इत्यस्य पदस्य समानार्थकं पदं किं**?** ।

(क) नृपः

(ख) राजा

(ग) राज्ञः

(घ) इनि

उत्तराणि:

(ग) राज्ञः

**(iv)** ‘व्यसनिनः’ अस्मिन् पदे कः प्रत्ययः**?**

(क) नः

(ख) निनः

(ग) ङीप्

(घ) राज्यं

उत्तराणि:

(घ) इनि

*(ख)* पीत्वा रसं तु कटुकं मधुरं समानं

माधुर्यमेव जनयेन्मधुमक्षिकासौ।

सन्तस्तथैव समसज्जनदुर्जनानां

श्रुत्वा वचः मधुरसूक्तरसं सृजन्ति।।

**(i)** समसज्जनदुर्जनानां वचः आकर्ण्य के मधुरसूक्तरसं सृजन्ति**?**

(क) दुष्टाः

(ख) सन्तः

(ग) दुर्जनाः

(घ) मक्षिकाः

उत्तराणि:

(ख) सन्तः

**(ii)** पूर्णवाक्येन उत्तरत

मधुमक्षिका कीदृशं रसं पीत्वा माधुर्यम् जनयति? .

उत्तराणि:

मधुमक्षिका कटुकं मधुरं रसं पीत्वा माधुर्यम् जनयति।

**(iii)** 'सृजन्ति' इति क्रियापदस्य कर्तृपदं किं**?**

(क) सन्तः

(ख) दुर्जनानाम्

(ग) मधुमक्षिका

(घ) वचः

**उत्तराणि:**

(क) सन्तः

**(iv)** ‘आकर्ण्य’ इत्यर्थे श्लोके किं पदं प्रयुक्त**?**

(क) वचः

(ख) रसं

(ग) तथैव

(घ) श्रुत्वा

**उत्तराणि:**

(घ) श्रुत्वा

**2.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत

**(i)** सुस्वादुतोयाः नद्यः प्रवहन्ति।

(क) का

(ख) के

(ग) काः

(घ) कानि

**उत्तराणि:**

(ग) काः

**(ii)** कृपणस्य सौख्यं नश्यति।

(क) कस्य

(ख) कस्याः

(ग) कस्मै

(घ) कस्यै

उत्तराणि:

(क) कस्य

**(iii)** यो दैवमवावलम्बते।

(क) किम्

(ख) कस्य

(ग) केषाम्

(घ) कासाम्

उत्तराणि:

(क) किम्

**(iv)** व्यसनिनः विद्याफलं नश्यति।

(क) काः

(ख) कस्याः

(ग) कः

(घ) कस्य

उत्तराणि:

(घ) कस्य

**(v)** 'त्यजति' इति क्रियापदस्य समानार्थकं किं**?**

(क) गृह्णाति

(ख) जहाति

(ग) धारयति

(घ) वर्धयति

उत्तराणि:

(ख) जहाति

NCERT 8th Sanskrit Chapter 1, class 8 Sanskrit Chapter 1 solutions

# Chapterwise NCERT Solutions for Class 8 Sanskrit :


- Chapter 1-सुभाषितानि
- Chapter 2-बिलस्य वाणी न कदापि मे श्रुता
- Chapter 3-डिजीभारतम्
- Chapter 4-सदैवपुरतो निधेहि चरणम्
- Chapter 5-कण्टकेनैव कण्टकम्
- Chapter 6-गृहं शून्यं सुतां बिना
- Chapter 7-भारतजनताऽहम्
- Chapter 8-संसारसागरस्य नायकाः
- Chapter 9-सप्तभगिन्यः
- Chapter 10-नीतिनवनीतम
- Chapter 11-सावित्रि बाई फुले
- Chapter 12-कः रक्षति कः रक्षितः
- Chapter 13-क्षितौराजते भारतस्वर्ण भूमिChapter 14-आर्यभटः
- Chapter 15-प्रहेलिकाः

# About NCERT

The National Council of Educational Research and Training is an autonomous organization of the Government of India which was established in 1961 as a literary, scientific, and charitable Society under the Societies Registration Act.  The major objectives of NCERT and its constituent units are to: undertake, promote and coordinate research in areas related to school education; prepare and publish model textbooks, supplementary material, newsletters, journals and develop educational kits, multimedia digital materials, etc.Organise pre-service and in-service training of teachers; develop and disseminate innovative educational techniques and practices;collaborate and network with state educational departments, universities, NGOs and other educational institutions; act as a clearing house for ideas and information in matters related to school education; and act as a nodal agency for achieving the goals of Universalisation of Elementary Education.In addition to research, development, training, extension, publication and dissemination activities, NCERT is an implementation agency for bilateral cultural exchange programmes with other countries in the field of school education.Its headquarters are located at Sri Aurobindo Marg in New Delhi. Visit the Official NCERT website to learn more.